114
13

सप्तशतीव्याख्या
नागेशभट्टकृता

Sapta Shati vyakhya

ध्यं॥ विश्वेश्वरीपदेनोपक्रमात् विश्वेश्वरीस्तुत्यामित्यपि॥ ७८॥ इतिसमाप्तोसावर्णेःकः ध्रकाशो
यत्र तादृशो मन्वंतरे तद्वर्णने इत्यर्थः॥ ॥इति शिवभट्टसुतसतीगर्भजनागोजीभट्टकृते सप्तशती
व्याख्याने प्रथमोध्यायः॥ १॥ म्स्यःशरखिवत्युक्तं तत्रेति हा सम्माह॥ अथ मध्यमचरित्रमिति॥ अ
सुराणामधिपे महिषे सति च पुनर्देवानामधिपे पुरंदरे इंद्रे सति देवा अ सुत्स्व प्रहृत्तो येय
त्र तादृशं युद्धं अब्दस्य तमासीदित्यर्थः॥ देवासुरमित्यत्र अर्शआदित्वादच् रंभासुरे तपस्यया
प्रसन्नस्य शिवस्यांशो यं जनयेयत स महिषः स च तपसा देवीनिकटे स्त्रमसायुज्यं
भवत्विति वरं प्रार्थितवान्॥ आदिसृष्टावुग्रचंडारूपया त्वं निहतः पुरा॥ द्वितीयसृष्टौ तु भद्र
भद्रकाल्या मया हतः दुर्गारूपेणाधुना त्वां हनिष्यामि सहानुगमिति कालिकापुराणेस्य
ष्टं॥ ३॥ तत्रेति॥ इंद्रस्य राट॥ ४॥ तत इति॥ पद्मयोनिर्ब्रह्मा॥ प्रजापतिमिति॥ तस्य विशेषणं॥ ब्रह्म
णः प्रजासृष्टृत्वेन सिद्धे संबंधत्वात् तदोदेवानां तत्रागमनं॥ ततः पालनसंहारयोः शिवविष्णो

देवा २

114/13

ध्यं ॥ विश्वेश्वरीपदेनोपक्रमात् विश्वेश्वरीस्तुतामित्यपि ॥ ७५ ॥ इति समाप्तो सावर्णेः कः प्रकाशो
यत्र तादृशो मन्वंतरे तद्वर्णने इत्यर्थः ॥ ॥ इति श्रीवमर्हेस्नुतसप्तशतीगर्भेजनार्गोजीभट्टकृते सप्तशती
व्याख्याने प्रथमोध्यायः ॥ १ ॥ स्वयं शस्त्रैखिव वत्युक्तं तत्रेतिहासमाह ॥ अधितां वाच ॥ देवासुरमिति ॥ अ देवा २
सुराणामधिपे महिषे सति च पुनर्देवानामधिपे पुरंदरे इंद्रे सति देवा असुराश्च ग्रहं जातो य
त्र तादृशं युद्धं मब्दसतं मासीदित्यर्थः ॥ देवासुरमित्यत्र अर्शआदित्वादच् ॥ ... पस्यं या
प्रसन्नस्य शिवस्यां सोयं जन्मत्रयेण तत्सुतो महिषः स च तपसा देवीनिकटे स्तमसायुज्यं
भवत्विति वरं प्रार्थितवान् ॥ आदिसृष्टावुग्रचंडामूर्त्या त्वं निहतः पुरा ॥ द्वितीयस्य सृष्टेस्तु भवा
न्भद्रकाल्या मया हतः ॥ दुर्गारूपेणाधुना त्वां हनिष्यामि सहानुगमिति कालिकापुराणे स्य
ष्टं ॥ १ ॥ तत्रेति ॥ इंद्रअसुरराट ॥ २ ॥ तत इति ॥ पद्मयोनिर्ब्रह्मा ॥ प्रजापतिमिति ॥ तस्य विशेषणं ॥ पाल
नः प्रजासृष्टत्वेन सिद्धसंबंधत्वाद्देवानां तन्नाशमनं ॥ ततः पालनसंहारयोः शिवविष्णो

देवाधिकाराः स्वत्रहरणं तयोः स्वविधेर्गमनं ॥ ३ ॥ यथावृत्तमिति ॥ देवानामभिभवस्य विस्तरः
प्रपंचो यत्रेति चेष्टितविशेषणं ॥ ४ ॥ स्वयमिति ॥ स्वैः स्वस्वयमित्यत्र एततदोरिति सुलोपः स
स्वयमिति द्विसकारपाठस्तु अनन्वीति द्वित्वेन बोध्यः ॥ ५ ॥ स्वर्गादिति ॥ निराकृताः निःसारिताः
॥ ६ ॥ एतदृ इति ॥ दृयोर्बहुवचनं गौरवात् ॥ वयं शरणं प्रपन्नाः आगतां स्मो भवामः ॥ ७ ॥ इत्थमि-
ति ॥ भ्रुवोः कुटीकौटिल्ये तेन कुटिले आनने ययोः सा तोऽस्य शब्दस्य पृषोदरादित्वात् ह्रस्वः कुटीरक-
प्रत्यर्थानां तत्कुटिका शब्द इति ऊर्ध्वभ्रूवलणः कोपि पिरजआधिक्येन श्रीवस्य तमोगुणस्याधा-
न्येन कोपपीत तमोगुणस्याधिक्ये नाविष्णुकोपस्य पालनमूलकत्वेन सत्वाधिक्य वत्त्वात्रिगुणे
प्रतिध्वन्यते ॥ अतएवोक्तं ॥ वैकृतिकरहस्ये ॥ सर्वदेवशरीरेभ्यो याविर्भूता महाप्रभा ॥ त्रिगुणा
सा महालक्ष्मीः साक्षान्महिषमर्दिनी ॥ तत्रापि रजः सत्वयोराधिक्यं देवानां रजः सत्वमयत्वा-
त् ॥ ८ ॥ ततइति ॥ द्वितीयं तत इति प्रसिद्धादित्यर्थे कं वदनादित्यस्य विशेषणं ॥ ९ ॥ अन्येषां चेति ॥
कुपितानामिति शेषः यत्तेजः निर्गतं तद्ब्रह्मादीनां तेजःसु ऐक्यं एकत्वं समगच्छत छांदसस्तु-

॥१०॥ अतीवेति ॥ तत्रेत्यस्य कालेऽद्रुतिदेशोद्रुतिवा शेषः ॥११॥ अतुलमिति ॥ तत्तदा तत्र पुराणेनांतर
प्रसिद्धकात्यायनाश्रमे कात्यायनस्य शिष्यं स्त्रीरूपेण मोहयंतं महिषं दृष्ट्वा स्त्रीत्वं लिह
लिष्यतीति ॥ आपतानि तितदाश्रमे रूपधरणमिति कालिकापुराणे स्पष्टं ॥ आश्विनकृष्णचतु
र्दश्यां अयमवतारः ॥ तदुक्तं कालिकाष्टम्यां तद्रूपं नवम्यां पूजा दशम्यां विसर्ज्जनं देव्या इति तत्रोक्तं
तत्तेजः एकस्थं सन्नारी अभवत् त्विषा दीप्त्या ॥१२॥ तेजोविभागेनांगविभागमाह ॥ यदिति ॥ शं
भोः श्वेतांगतया तत्तेजसा जातं मुखं श्वेतमित्यर्थः ॥ विष्णोर्नीलवर्णतया बाहवोऽष्टादश नीलाः
॥१३॥ सोम्येति ॥ सोमसंबंधिनेत्यर्थः ॥ क्षीरसत्वादिदमर्थ विधरण ॥ अत एतत्श्वेतकानी पुंद्रेण म
ध्यं रक्तं जंघोरू इति भिन्ने पदे जंघा ऊरू च वा रूपेण नेत्यन्वयः ॥ भुवः पृथिव्याः नितंबः कटि पश्चा
द्भागः ॥१४॥ अरुणेति ॥ अतएव पादौ रक्तौ तदुक्तं वैकृतिकरहस्ये ॥ श्वेतानना नीलभुजा सुश्वे
तस्तनमंडला ॥ रक्तमध्या रक्तपादा नीलजंघोरुरुन्मदा ॥ सुचित्रजघना चित्रमाल्यांबरविभूष
णा ॥ चित्रानुलेपना कांतिरूपसौभाग्यशालिनीति ॥ एवं च रूपेणापि त्रिगुणत्वं सूचितं ॥

स्वस्य चित्रत्वात् ॥ चित्रमाल्यादिधारणं वस्त्रत्लामित्यस्य तेजस इति शेषः ॥ एवमन्यत्रापि ॥ १५ ॥ तस्या
स्तु ति ॥ प्रजापतेन दंष्ट्राः प्राजापत्येन तेजसा नयनत्रयं जज्ञे तेजसा पावकेनेत्यन्वयः नन्नविरोधः पावकोऽग्निः ॥ १६ ॥ भ्रु
वौ चेति ॥ संध्ययोस्तेजसः भ्रुवौ बभूवतामित्यन्वयः ॥ कर्णस्यैव कर्त्तृत्वविवक्षा ॥ पुंनपुंसकयोः
कर्णैः श्रवणः श्रवणं श्रुताविति हेममाली ॥ अन्येषां च देवानां संबंधितेजसां शिवायाच संभव
एकीभावः कार्यं वेत्यर्थः ॥ एवं प्रसिद्धो ॥ १७ ॥ ततइति ॥ तेजोराशिसमुद्भवामिति सापेक्षत्वेपि गम
कत्वात्समासः मुदं हर्षं ॥ १८ ॥ शूलादिषु विद्यमानस्य तेजसेव भगवती शूलं विनिर्भत्तेति तात् ॥ पर्य
मेव मायुधदानमपि बोध्यं ॥ शूलमिति ॥ विनिष्कृष्य आकृष्येत्यर्थः ॥ समुत्पाद्य जनयित्वेत्य
र्थः ॥ यद्दर्णयं तस्य स्वरूपं एवमग्रेपि ॥ अत्र चकारो चेति चाकृता ॥ १९ ॥ शंखं चेति ॥ वरुणदत्तं स्वस्मा
त्तेः शक्तेः ॥ वायोश्चापबाणयोर्लाभ इत्यर्थः ॥ शंखं चेति च कारेण वक्ष्यमाणपाशसमुच्चयो यथार्थे
वा ॥ २० ॥ वज्रमिति ॥ इन्द्र अमरेशः देवस्यैव दातुः पुंसत्वेनु रूपात्ततेपि न दोषः ॥ २१ ॥ कालेति ॥ उ
पादेति शेषः ॥ प्रजानां पतिः ब्रह्मा इह माला अक्षमाला कमंडलुं च ददावित्यन्वयः ॥ अक्षमालाकमंडलु

मिति वामनपुराणात् ॥ स्र ॥ समस्तेति ॥ कालोनिमेषाद्यभिमानिनी देवतातत्स्याद् इति संबंधात्त्वेन वि
वक्षाया अक्षौही होरश्चेति ॥ अंगुलीयकमरलंदानां तं ह्रीं होरे कर्त्तौ ॥ विश्वकर्मणः परशु ॥ अस्त्रस्य व
चस्त्रजत्वं ॥ चूडामण्यादिकं वरदानांतं विश्वकर्मणः कर्तृत्वमित्यन्वयः ॥ तन्मतेऽर्धचंद्रशब्देन तद
ग्रोललाटभूषणविशेषः ॥ अम्लानेत्याद्यारभ्य पंकजदानानां जलधिः कर्त्ता तत्र पंकजं हस्तयोस्तत्र सिं
हयोर्दाने हिमवान् कर्त्ता अथ ददिति ॥ ददतानेत्यस्य लङि रूपं छांदसत्वात्परस्मैपदं ॥ रव ॥ ददावि
ति ॥ अनेनाष्टादशभुजा सहस्रभुजा चेयमिति सूचितं ॥ तदुक्तं वैकृतिकरहस्ये ॥ अष्टादशभुजापू
ज्या सा सहस्रभुजा सती ॥ अष्टादशभुजाधारणविधिरुच्यते ॥ सामान्यतश्चान्येष्वपि देवैरायुधै
रित्युक्तं श्चेति भावः ॥ आयुधान्यत्र वक्ष्यंते दक्षिणाधः करक्रमात् ॥ अक्षमाला १ च कमलं २ बाणो
३सि ४ कुलिशं ५ गदा ६ चक्रं ७ त्रिशूलं ८ परशुः ९ शंखो १० घंटा च ११ पाशकं १२ शक्ति १३ दंडः १४
चर्म १५ पद्मं चापं १६ पानपात्रं १७ कमंडलुं १८ ॥ अलंकृतभुजामेभिरायुधैः कमलासनां ॥ सर्वदेवम
यीमीशां महालक्ष्मीमिमां नृप ॥ स्रजयेत्सर्वलोकानां सदेवानां प्रभुर्भवेदिति ॥ एवं चस्वरूपा

युधेरस्याश्चालीत्वं वैरखीत्वं शोचीत्वं च त्रिगुणत्वं च सर्वमत्तलभ्रत शक्तेरयं प्रादुर्भावतस्स
मानइतिस्रचितं ॥ यद्यप्यत्र ब्रह्मादीनां इंद्रादीनां च शरीराणि क्रांतं तेजो देवी विग्रहरू
पेणाभिव्यक्तमासीत् आयुधानि च दैवैः ॥ स्वस्वस्तादिभ्यो विनिर्गम्य दत्तानि त्युक्तं ॥ तथा
पि देवीमाहात्म्ये एवं तत्तद्देवपालनीये केदेश पालन शक्तित्वेन येदेव्या निवेशिता स्त एव
महिषवधेन सर्वलोकरक्षणाय पुनरेकीभूय प्राप्ताः ॥ एवं तस्य युधि जन्मकं साऽपी
तिबोध्यं ॥ अहं बिभर्म्यावदुभिरित्यादित्ताय चरित्रगतवचनसमूहानु ॥ लक्ष्मीतंत्रेऽपिप्र
क्तं ॥ श्रीति लक्ष्मीवचनानि ॥ महालक्ष्मीरहं शक्रो पुनः स्वायंभुवेंतरे ॥ हिताय सर्वदेवानां जा
ता महिषमर्दिनी ॥ मदीयशक्तिलेशाये तत्तद्देवशरीरगाः ॥ धृतं मयातेः संभृतेरूपं पर
मशोभनं ॥ आयुधानि च देवानां यानियानि सुरेश्वर ॥ मद्दत्तेयस्तदाकारा एवायुधानि
ममाभवन्निति ॥ वर्षातेन वरात्रेत्यन्ता महिषमर्दिनो भियामले ॥ संभावितेति ॥ सा

ट्टहासमितिनादक्रियाविशेषणं ॥ अट्टहासोऽत्यर्थहासः नभ इति भुवर्लोकोपलक्षणं ॥ २१ ॥
आमायतेति ॥ मामाने दैवाद्दिवाव्युतानन्त्समासः तेन संभवतेत्यर्थः ॥ अस्य नभसीत्यादि
तत्र हेतुरतिमहत्त्वं चुक्षुभुरित्यस्य प्रतिशब्देनेत्यादि ॥ २२ ॥ चचालेति ॥ महीधराः पर्वताः ॥ २३ ॥
तुष्टुवुरिति ॥ नम्र आपकृष्ट त्वज्ञानवान् आत्मशरीरं च नम्रं नतं येषां संक्षुब्धं आ
कुलं जातमिति शेषः ॥ आमाणायपश्च संक्षुब्धा इत्यर्थः ॥ २४ ॥ सेनन्देति ॥ क्षुब्धाय सज्जानिषद्ध
तसंनाहानि आखिलसैन्यानि येषां आः इति क्रोधाविष्कारे अनेन च महिषासुरस्य तमोम
यत्वं उक्तं ॥ दूना प्रेषणात् ॥ कस्य चित्सैन्यस्य प्रथमप्रेषणात्त्वद्रूपेण पितमोमयत्वाच्च ॥
अत एव रजःसत्वाधिष्ठदेव्याश्च सत्त्वं ॥ २५ ॥ अभ्यधावतेति ॥ स्वावितेन ॥ २६ ॥ देवीं विशोषयति
सार्द्धेन ॥ पादेति ॥ धनुर्योज्याय प्रभूनिःस्वनेन धनुषष्टंकारः ज्याघात ष्टंकारः ॥ २७ ॥ दिश
इति ॥ समंतात्सर्वतः ॥ २८ ॥ शस्त्रैरिति ॥ शस्त्रं केवलं मंत्रप्रयुक्तं तदस्त्रं ॥ २९ ॥ युयुधे इति ॥

अन्यैःप्रधानदैत्यैःसहितः चामराख्यः त्विह्वराख्य श्वरथमातंगहयपादातनरूपचतुरंगसेना
युतो युयुधे इत्यर्थः ॥४०॥ अयुध्यतेति ॥ अयुतानामिति प्रयुते इति च तत्र तत्र बहुत्वविवक्षया बहुव
चनं ॥ एवमग्रेपि ॥ एकं दशशतं चैव सहस्रमयुतं तथा ॥ लक्षं च नियुतं चैव कोटिरर्बुदमेव च
वृंदं खर्वो निखर्वश्च शंखपद्मौ च सागरः ॥ अंत्यं मध्यं परार्धं च दशवृद्ध्या यथाक्रममिति
वचनात् ॥४१॥ अयुतानामिति ॥ गजेभ्याजीव्यतो विडालस्यैवैनं ॥४२॥ वृत इति ॥ अथ ते
षांवधानंतरं अयुतानां पंचाशद्भिः प्रयुतैः परिवारितो बिडालनामा तत्र संयुगे युयुधे ॥ इत्यु
त्तरश्लोकेनान्वयः ॥ दुर्धरो दुर्मुखश्चैव बिडालनयनस्तथेति वामनपुराणेपि ॥ विडालनय
न शब्दो योगरूढो न केवलयोगिकः प्रकृते च नामैकदेशो नाम ग्रहणं ॥ अत एव बिडालस्या
क्षिणीति वक्ष्यमाणं संगच्छते ॥४३॥ युयुधे इति स्पष्टं ॥४४॥ युयुधुरिति ॥ अस्य पद्येनान्वयः
आशीषपरस्मैपदं ॥ उत्तरार्द्धमुत्तरान्वयि ॥४५॥ हयानां चेति ॥ रथदंतिहयानां प्रत्येकं कोटिको

रिसहस्रसंख्याद्युतोमहिषस्तत्राभूदित्यर्थः॥ उत्तरार्द्धमुत्तरान्वयि॥ भिंदिद्धिति रंत्यांतः॥४६॥
युयुधुरिति॥ केचिदित्यादि इतिशेषः॥ अपरे उत्तरान्वयि॥४७॥ लीलयैवेति॥ देवीमिति॥ अपरे तु
तेप्रसिद्धादैत्यादित्यर्थः॥ श्रोयाभ्यामित्यात्मनेपदं न छांदसत्वात्॥४८॥ लीलयैवेति॥ आधार
हिताननाः॥४९॥ मुमुचेति॥ उत्तरार्द्धउत्तरान्वयि धुताः कंपिताः॥५०॥ चचारेति॥ उत्तरार्द्धमु
त्तरान्वयि यावद् यावतः॥५१॥ तएवेति॥ तावंत एवेत्यर्थः॥ एकैकनिश्वासादेवैकगणाः संभूता इत्य
र्थः तेगणाः केचिदितिशेषः॥५२॥ नाशयंत इति॥ देवीप्रभावेनाप्यायिताः अवादयंतः वादितवंत
इत्यर्थः गणाः केचिदितिशेषः॥५३॥ मृदंगांश्चेति॥ युद्धमेव महोत्सवो वीराणां हर्षहेतुत्वात्॥ प्रा
कीर्णां वृष्टिभिर्वर्षैः ऐरेरित्यर्थः॥५४॥ खड्गेति स्पष्टं॥५५॥ असुरानिति॥ अकर्षयदिति॥ कृषेस्त्वेम
दिकालतः॥ अपरदिद्धमुत्तरान्वयि॥५६॥ विपोथिता इति॥ अपरेगदया विपोथिताः आमर्दिता निपा
तनेनकिपतनेन नुविश्रोरतिरित्यन्वयः॥ वेमुरिति छांदसं॥५७॥ केचिदिति॥ शूलेन वक्षसि भिन्ना
न्नमोनिपातिताः निपेतुरित्यर्थः॥ उत्तरार्द्धमुत्तरान्वयि॥५८॥ सेनेति॥ सेनामनुपश्चात्कुर्वंति

तसेनागजाः शरौघव्याप्तत्वात्॥ सेनाः शल्लकाः तत्सदृशाश्च॥ अपरे छिन्नग्रीवाः प्राणान्मुमु
चुरित्यर्थः॥ ५८॥ शिरांसीति॥ छिन्नानीति शेषः॥ ६०॥ एके इति॥ आशिरःपादपर्यन्तं॥ पाटिताइ
त्यर्थः॥ उत्तमाङ्गं भुजमध्यौ च॥ ६१॥ कबंधा इति॥ मनुष्याणां सहस्रे सुहते सुहृत्ते महद्वसु॥ तदावेष्टा
ल्कवंधः स्यादेकोऽमलयोग्निक्रियान्वित इति लक्षिताः॥ अपरे कबंधा वाद्युयुधुः॥ ६२॥ कबंधा इति॥ उभ
यत्रापि युयुधुरिति शेषः॥ विछिन्नशिरस इति स्वरूपकथनं छिन्नानि शिरांसि यैरिति वारिस्व
थः॥ उभयतो धाराः खड्गाः भाष्यंत इति छांदसः प्रमा॥ पातितैरिति॥ रथनागसादिभिरश्वैरित्य
र्थः॥ एवमन्ये पि यद्वाश्वाणां रूपसेनागानामित्यत्र सेनां गाः शब्देन रथिकादीनामेव ग्रहणमि
ति नात्र नियम प्राप्तिः॥ ६३॥ ६४॥ शोणितेति॥ असुरसैन्यस्य मध्ये वारणासुरवाजिनां शोणित
स्य ओघः प्रवाहो यासु ता दृशो नद्यः॥ प्रसुस्रुवुः॥ छांदसत्वात्समासः॥ ६५॥ ६६॥ सद्य इति॥ दा
यं निःशेषं इति शेषः॥ तत्र तत्रेत्यत्र॥ असुराणां शरीरेभ्यो ऽस्रुन् विच्छिन्नचतीव॥ अनेन लक्ष्यते यो
ऽगम्यश्च छांदसः॥ ६७॥ दृष्ट्वा इति॥ चोपपार्थे नेत्रेषु इति॥ ६८॥ इति श्री शिवभट्टसुत सतीगर्भजना

गोजीनहृत्कृते सपसतीव्याख्याने द्विजीयोध्यायः॥ स्वात्रे श्रिकवचा॥ निहन्यमानमिति॥ पर॥ तस्येति॥
उत्करः समूहः वाजिनां यंतारं च जघानेत्यन्वयः॥ ३॥ चितेदेति॥ आप्लुगाः वाहनाः॥ ४॥ ५॥ सिं
हमिति॥ सव्यवामे॥ ६॥ तस्यारिति॥ पप्लवविप्लोएति तस्याभुजा मित्यन्वयः॥ ७॥ चितेपेति॥ नतः स्फु
लं श्रंघराई विव भिवेत्पुनरन्वयि॥ तेजोभीरवीत्यत्र कुलोलह्नतिदीर्घः॥ ८॥ दष्टेति॥ नतः एवं सु
दर्शनल मापत्॥ आगच्छतदष्टेइत्यर्थः सचशनतधानीतइतिशेषः॥ ९॥ १०॥ सोपीति॥ हुंका
रेतिहस्वः॥ ११॥ १२॥ नतइति॥ सकृत्पत्य आप्लुत्य गजकुंभांतर स्थितइत्येकं पदं॥ १३॥ युध्यमाना
विति॥ नागात्गजात्॥ पुप्लुधातोलित्यत्र गप्लुत्य भाविछांदसः॥ १४॥ ततइति॥ युद्धानंतरं वेगा
त्खंउत्पत्य गत्वा पुनस्ततो निपत्यावतीर्येत्यर्थः॥ १५॥ उदग्रस्येति॥ रणेयुद्धे॥ दंतैर्गजदंतानि
भिं ताबुधैः मुष्टिभिः॥ तलैः चपेटैरित्यर्थः॥ यद्वा दंतैर्दन्तहतो इत्यर्थः॥ १६॥ देवीति॥ उद्धतं त
न्नामानं दैत्यं भिंदीतिदमध्यः॥ १७॥ १८॥ बिडालस्येति॥ यमसत्वयंयमगृहं॥ १९॥ एवमिति॥ गण्णा
न्निर्गच्छाशत्र्यान्॥ २०॥ कांश्चिदिति॥ खुरः कवर्गादिः॥ २१॥ वेगेनेति॥ वेगा गतेः भ्रमणं मंडलाका

रणीतिः ॥२२॥ निनात्वेति ॥ अमर्षाः गणाः ॥२३॥२४॥ वेगेति ॥ वेगाद्युक्त्याध्यमरणेन विक्षुब्धाः कुट्टिताः आ
पीर्यन्तेति कर्मकर्त्तरि रूपं सर्वतः सर्वे शाखाश्च विभक्तिः केसराः ॥ श्वासवायुर्मा सजलेनेति विशेषः ॥
॥२५॥ धुतेति ॥ कंपिते इत्यर्थः ॥ स्वं उस्य स्वं उग्राय स्यां क्रियायां श्वासानिलेनाकम्पं ध्वस्ताः ॥ छिदाः
अचलाः ॥ पुनराकाशान्त्येनु रित्यर्थः ॥२६॥२७॥ सेति ॥ सा तस्याः परिवाशं हित्वा तं वबंधत्यन्वयः ॥२८॥
नतइति ॥ नस्य सिंहीभूतस्य अंहस्य तद्दैव्येति शेषः ॥२९॥ नतइति ॥ तं पुरुषं देवी आम्बिकैव खड्गचर्मणेति
समाहारद्वंद्वः ॥ तस्मात्सहितैः सायकैः स्वैश्छेदेत्यन्वयः ॥३०॥ करएति ॥ महासिंहं देवीवाहनं ॥ कर्षत इत्य
स्य सिंहमित्यादेः निरहंतेति छान्दसं ॥३१॥ ततइति ॥ तथैवश्रा स्वदेव ॥३२॥ नतइति ॥ महिषस्य शिवा
दत्वेन जायमानत्वं यथा दृष्टि छेत्तुशाया अमधुपानं ॥ कुद्धधर्मवोधयितुं अमनाटनेवा एतत् ॥ पानं
मद्यं कर्मणि ल्युट् ॥ पानात् दृष्टिलोचना पुनः पुनः जहासचेत्यन्वयः ॥३३॥ ननर्देति ॥ बलं शरीरं
वीर्यमुत्साहः ताभ्यां महोत्कटैः ॥३४॥ सात्वेति ॥ मदेनोद्भूत अतिशयेन जातो मुखे रागो यस्याः सा
आकुलाक्षरमिति वचन क्रियाविशेषणं मद्यस्वभावोयं ॥३५॥ रेक्षणा ॥ गर्ज्ज गर्ज्जेति ॥ संप्र

मलाद्धिन्नास्मिदेनच॥ पिबामीति॥ सर्वं जयाविष्णुस्त्रिस्तु राज्ञानं प्रति अरिष्टिरिति न दोषः॥ २५॥ अरिष्टि
तं वा च॥ एव मिति॥ समुत्पन्नस्य हृद्दिनं कृत्वा तं सा आरूढाः॥ अथ पुनः पादेनाक्रम्य इंद्रं वध्वा कण्ठे शल्ले
नाताडयदित्यन्वयः॥ २७॥ तत इति॥ तथा यदा आक्रांतः इंद्रं धृतो विसत्ततेः शल्लेन ताडनो जातः ततः म
हिषस्य रूपो ज्वालाजिह्व मुखाद्दधे निःक्रांतः निःसृतः ताडकाय एवं देव्या वीर्येण आक्रांतिशायेन सं
वृतः प्रति बद्धः निःक्रान्तुं नाशकदित्यर्थः॥ २९॥ अर्धेति॥ एवंच शिरच्छेदोऽद्भवं तद्दृष्ट्वा न वं शल्लया
शेन निपत्य शिरच्छेदस्य योऽद्भवो यस्येत्यर्थो वाच्यः॥ यद्वा कंठे शल्लेन ताडनमेव शिरच्छेदः
तत्त्वथा विशेषः कल्पांतरीय इति तत्र॥ पुराकल्पे यथा वृत्तं प्रतिकल्पं तथैव तु॥ प्रतिकल्पं स्व
यं देवी दैत्यानां नाशनाय वै॥ तथैव जायते युद्धं तथैव त्रिदशागम इति रामवृत्तांतवल्लीनैका
लिकापुराणात्॥ वृत्तं प्रवहात्स्तेन क्रियाप्रतिकल्पमेकज्ञानीयैव न तु विजातीयाउत्पत्तौ तु के
ल्पभेदेन कश्चिद्भेदो हरिवंशादिप्रामाण्यादित्येव तत्त्वं वल्लिवैवृत्ते प्रथमे शेषप्रतिकल्पं कृष्णच
रितमेव मेवान्यथेति नारदप्रश्ने प्रतिकल्पं त्वेवमेव चरितं नात्र संशय इति॥ स्तु॥ जप

सप्तशी॰ २४

त्वा॥ अर्ध्या॥ तत इति॥ ननाशापालयितं॥ हाहेतिकृतं येनेति सैन्यविशेषणं॥ ५०॥ तुष्टुवुरिति॥ सुरा इन्द्रा
द्या देव्यै वेद्धादिभिः सह महर्षिभिश्च सह तुष्टुवुरित्यर्थः॥ ५१॥ इति श्रीशिवभट्टसुतसतीगर्भजना गो
जीभट्टकृतसप्तशतीव्याख्याने तृतीयोध्यायः॥ ३॥ तुष्टुवुः सुरा इत्युक्तां तां स्तुतिमाह॥ ऋषिरुवाच॥
शक्रादय इति॥ आदिना महर्षयस्तस्मिन्महिषे हिंसासुरे देव्या निहते इत्यन्वयः॥ शिरोधराः ग्रीवाः अं
साः स्कंधाः पुलका रोमांचाः॥ २॥ देव्येति॥ आततं व्याप्तं॥ ततं स्वरूपं च निःशेषदेवगणशक्तीनां स
मूहेनायद्रूपं तेनशक्तिसमूहह एव तेजोंशाद्वैव यथ एवमूर्त्तिर्विग्रहो यस्यास्तयेत्यर्थः॥ समूहह
ति भावकः॥ नताः स्मेत्यत्र विसर्गलोपः॥ ३॥ यस्या इति॥ यस्याः अतुलं प्रभावं तेजः बलं च प्राशौ
वक्तुं अनंतः सहस्रास्योपि ब्रह्मा स्वच्छाहारः सर्वेशश्चेत्यपि नालं न पर्याप्ताः॥ अशुभभयाभ
यस्येत्यर्थः द्वंद्वोष्टः समाहारे॥ ४॥ या श्रीरिति॥ पापात्मनां भवनेष्वलक्ष्मीः कृतधियां निर्मलां
तःकरणानां हृदये बुद्धिः स्वर्गापवर्गसाधनं ज्ञानं सतां हृदये श्रद्धा आस्तिक्यबुद्धिः कुल
जनप्रभवस्य शुद्धवंशजन्मनो हृदये कुललज्जाकरणीयाकृत्यजनकांतःकरणप्रवृत्तिविशे २४

यः ॥ न तास्मीति भावः ॥ ४ ॥ एवं आश्रयानंतस्तुतिविस्तृतस्तवमस्तुत्यैवेत्याह ॥ किमिति ॥ असुरान्दे
त्यान्देवाः क्षिवाद्यस्य गणाः क्षयमास्तस्वभ्रातेषु ॥ अचिंत्यं सर्वैर्लोकैरकल्प्याद् इति रूपणीयं तव स्वरूपं
तः किं केन प्रकारेण वर्णयामः ॥ असुरदैत्यनाशकारि भूरि वीर्यं अति अत्युत्कृष्टं च परं युद्धेषु या
नि चरितानि तान्यद्भुतानि अत्युत्कृष्टानि अतः किं वर्णयामेत्यन्वयः ॥ सर्वत्रापि त्वत्परमन्वेति ॥ ५ ॥
मूलप्रकृतित्वमेवेत्याह ॥ हेतुरिति ॥ त्वं समस्तजगतां हेतुर्मूलकारणं ॥ तत्र हेतुर्यतः त्रिगुणा ॥
सत्वरजस्तमोयुता ॥ नन्वेवं रागादिसंबंधेन सर्वकारणत्वं न स्यादत आह ॥ अपीति ॥ त्रिगुणा
पि दोषैः रागादिभिर्न ज्ञायसे नाश्रिता भविष्यसि यदा दोषैर्विशिष्टा केनापि न ज्ञायसेत इभा
वादित्यर्थः ॥ नन्वेवं परिछिन्नतया सर्वहेतुत्वं न स्यादत आह ॥ हरिहरादिभ्यपारा ॥ अज्ञातपरि
छेदः परिछेदाभावादित्यर्थः ॥ तत्र हेतुर्यतः सर्वाश्रया सर्वमाश्रयः कार्यस्य कार्यं हि कार
णमाश्रयते ॥ सर्वत्र वर्त्तमानाच्च यतश्च एतज्जगत् तवांशभूतं सर्वं समष्टिरूपेण त्वदंशात्वा
त् ॥ एतद्वयं परिछिन्नत्वे व्याहतं स्यादिति भावः ॥ नन्वेवं विकारापत्तिरत आह अव्याकृताश्च

यविकारहीनत्वात्॥ नामरूपहीनत्वाच्च॥ ह्रियतः संसारस्याधारत्वमायाप्रकृतिः सत्त्वरजस्तमसां
साम्यावस्थासि॥ कीदृशी परमा परमात्मा मीयते जीवभावेन विच्छिद्यते॥ यथा परमात्मैव प्राकृ
तधर्माध्यासाज्जीवत्वेनाध्यवसीयते॥ ह्॥ य स्वाहा इति॥ हे देवि यस्याः समुदीरणेन उच्चारणेन सम
स्तासुरतोसकलसुरसमूहः॥ सर्वयज्ञेषु तृप्तिं प्राप्नोति सा स्वाहात्वमेवासि॥ वेदप्रसिद्धं॥ तथा
पितृगणस्यापि तृप्तिहेतुत्वमेव यतः अत एव जनैः पितृकर्मणि॥ स्वधा च उच्चार्यसे चात्स्वा
हा देवकर्मणि॥७॥ स्वप्रकृतिरूपत्वं मुक्त्वा ब्रह्मापित्वमेवेत्याह॥ येति॥ हे देवि या मुक्तिहेतुः अवि
चिंत्यमनुष्ठेयत्वं चिंताया अप्यविषयं महाव्रतं अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहरूपं
योगशास्त्रे प्रसिद्धं साधनं यस्याः ईदृशी च या सा भवती भगवद्विद्या परमा उत्कृष्टा विद्या
तत्वमथावरणभंजिका ब्रह्मज्ञानरूपात्वमेवासि॥ ह्रियतेः अतस्त्यक्तसमस्तरागादिदोषैर्मो
हेच्छुभिर्मुनिभिर्वशीकृतेंद्रियैः तत्त्वं ब्रह्मैव ज्ञेयत्वेन सारोपेर्यां तैरभ्यससे दृष्ट्वाथः॥ च अभ्या
से दृश्यत्वसंधिःसहिताया अनित्यत्वात्॥ ८॥ शब्देति॥ सुविमलानां अपोहपथत्वेन दोषरहि

तानां ऋचां यजुषां उद्गीथः साम्नां भक्तिविशेषः ॥ तेन रम्यं पदं पाठो येषां तेषां साम्नां च निधान
मास्रयः शब्दब्रह्मरूपा भवस्य संसारस्य भावनाय धर्मवृत्त्य विच्छेदाय या देवी द्योतनशीला त्र
यी वेदः सा त्वं भगवती भवंति ते भावाः प्राणिनस्तेषां भावनायजीवनाय कृषिवाणिज्यपशु
पालनरूपा वार्त्तापि ॥ त्वमेव भगवती वार्त्ता त्रयोर्विशेषणं सर्वजगतां अतिशयार्त्तिहं
त्री अनेन विद्या सर्वविद्यास्वरूपा त्वमेवेत्युक्तं ॥ ९ ॥ तदधिष्ठात्र्यपि त्वमेवेत्याह ॥ मेधासीति ॥
मेधा सरस्वती सैव दुःखप्राप्यत्वेन दुर्गासीत्युच्यते ॥ दुर्गमसंसारसागरस्य नौः ज्ञानद्वारा ॥
एवं पूर्वार्द्धेन आन्वीक्षीत्वं ॥ प्रसिद्धेनोते व्यतिरेकमाह असंगेति ॥ साहि कर्णधाराहि संगवती ॥ अं
गीकृता प्रतिष्ठा आस्य दंड्या आर्ये शरीरत्वात् ॥ उत्तरार्द्धेन श्रीवीत्वं वैष्णवीत्वं चोक्तं ॥ १० ॥ ईष
दिति ॥ ईषद्धास सहितं ... पदव्यत्ययः सर्वार्द्धोक्तगुणविशिष्टं तव वक्त्रं विलोक्यापि ॥ आ
सरोषेण महिषासुरेण सहसा दर्शनसमकालमेव तथा ऽतिनिष्ठुरं यत्प्रहृतं तदत्याश्चर्य
मित्यर्थः ॥ जगन्मोहकमपि दृष्ट्वा न तस्य मोह इत्यतिभ्रमरोयं ताद्रूपस्यापि वधेन देव्याए

वीक्ष्यार्थः सिध्यते ॥११॥ दृष्ट्वा त्विति दृष्ट्वापीत्यर्थः ॥ भ्रुवोः कुटी वक्रता तया करालं भीषणं उद्यच्छशां
केत्यनेनापि तिरस्कृतां अनेन दृष्ट्वेत्यर्थः प्राणव देव ॥१२॥ देवीति ॥ देवि प्रसीदेत्युक्त्वा किंचार्यं व्यर्थ
मेतद्वचः प्रसन्नत्वादेव तवेहाह ॥ भगवती परा सा नु महा साधुद्धि येत्यास्ता दृश्यी ॥ कथमेतत् ज्ञा
नं तत्राह ॥ यतो नो भवाय कोपवती सती त्वं नो रिपूणां कुलानि सद्यो विनाशयति तत्र संप्रति
पत्तिमाह विज्ञातमित्यादि ॥ एवं कोपोऽर्थं रहस्य फलकोनितु स्वभाविक इति सत्वगुणप्रधान
त्वं ध्यानितं ॥१३॥ ते इति ॥ संमताः महाजनानां मीकृताः धर्मपरितोषाः धर्मोर्थकाममोक्षरूपः
धन्याः पुण्यवत्वेन प्रसिद्धाः निभृताः नितरां याधिताः गृहीता एव अभ्युदयः सर्वमनोरथदा ॥१४॥
॥ धर्म्याणीति ॥ हे देवि भगवती प्रसादात् यासुकृती ॥ प्राग्जन्मार्जित पुण्यवान् सतत एव सुकृत
लब्धत्वप्रसादादेव ॥ अत्यादृतः नित्यनैमित्तिकादरवति श्रद्धावान् ॥ प्रतिदिनं सदैव अच्छिद्यपि
कावच्छेदेन सकलानि धर्म्याणि कर्माणि करोति पुनस्तत एव त्वत्प्रत्युद्देशेन कृतकर्मभ्योल
ब्धत्वप्रसादादेव स्वर्गं प्रयाति ॥ ततः क्रमेण चान्मोक्षं च ॥ ननु निश्चये ॥ तेन त्वं लोकत्रये पिप

तस्मादितितस्मात्तेदइति विशेषः॥१५॥दुर्गेति॥ दुर्गे दुर्गमे संकटे इति यावत्॥ तन्नामेइतिच तारेच्य
शब्देभावेघत्र् प्रतिकूल धाजि साधनजं॥ आर्द्रचित्ता स्निग्धचित्ता॥ दुर्गे स्मरणं च दुर्गा जगदि
दं सर्वं दुर्गा सर्वस्य कारणं अहं दुर्गा इत्येवं रूपं॥ विष्णुर्जगदिदं सर्वं विष्णुः सर्वस्य कारणं॥ अ
हं विष्णुरितिच यद्विष्णोः स्मरणं विदुरिति वहन्नारदीयोक्तेः॥१६॥ सर्वोपकारित्व मुपपादयति
॥एभिरिति॥ दैत्यैरित्यर्थः॥ उपेतीतिलेट् उपेलित्यर्थः॥ एतेदैत्याः नामेत्यभ्युपगमेनरकाय्येति
तादर्थ्येचतुर्थी॥ तथापिरणमृत्युं प्राप्य स्वर्गं गच्छंतु इति हेतुद्वयं मनसिकृत्वा जगादहितान्हं
सीत्यर्थः॥१७॥दृष्ट्वेति॥ दृष्टोनोत्तरमेवतावत्॰ मात्रेणैव भस्माकरणयोग्येष्वपि यत्त्वं शस्त्रं पा
तयसितत्तेषामुत्तमलोकप्राप्त्यर्थं इति तेष्वप्युपकारके वत्वमिति किंवक्तव्यं भक्तेष्विति भावः॥१८॥
खड्गेति॥ निकरः समूहः विस्फुरणं सर्वत्र प्रसरणं निवहः समूहः यद्विलयं नागतास्तदेतत्त्व
शुभानन यद्दृष्ट्वेति स्तद्योगितचोत्तमाननं विलोकयतां च इन्दुखंडमात्रेण याद्रियेति शेषः॥१९॥दुर्वृत्ता
नां वृत्तं पापं तत्स्वशमनं तव शीलं स्वाभाविको गुणः न तथान्यैरतुल्यमतएवाविचिंत्यं वीर्यमि

सप्त° टी°
२७

तिचिंताऽविषयः इत्थेव किंनेत्यादिनोक्तं ॥ रूपमाकृतिः च परं हृता आत्मसात्कृता देवा येन इह प्राः परा
क्रमो येषां ते थादित्यानां हंतृवीर्य ॥ एवं चेद् इशाः रूपेण इशावलेन च तेषां शास्त्रतो हननमपि तत्क्षय
पापशांतये इति तेषु दयैव त्वया कृतेति भावः ॥ २० ॥ केनेति ॥ अतिहारि मनोहरं विरोधात्र लंकारः
केनोपमेति तृतीया आर्षत्वात् ॥ चित्ते कृपा अरिषु युध्यपि उपकारकत्वात् ॥ निष्ठुरतानुत्पत्त्यैव ॥ अत्र
कृपा स्वाभाविकी निष्ठुरता स्वाराधितेति विरोधपरिहारः इति बोध्यं ॥ २१ ॥ त्रैलोक्यमिति ॥ त्व
यत्यंतमेकान्वयः ॥ ततो रिपुगणाद् इत्यंतमपरं वाक्यं भयमित्यतो भयमित्यंतमपरं ॥ अनेन वि
जेकृते त्येतद्वृत्तं ॥ नमस्ते इत्यनेन नमस्कारातिरिक्त प्रत्युपकारकरणे नास्माकं सामर्थ्य
मिति ध्वनितं ॥ २२ ॥ २३ ॥ प्राच्यामिति ॥ दक्षिणे इत्यस्य दिग्भागे इति शेषः ॥ भ्रामणेनेत्यत्र इच्छा
भावः आर्षः ॥ २४ ॥ सौम्यानीति ॥ सत्त्वस्थितिव्यापाराणि ॥ अत्यर्थघोराणि संहारव्यापाराणि
न तथा भुवं पृथिवीं चेत्यर्थः ॥ २५ ॥ खड्गेति ॥ संगः संसर्गः ॥ २६ ॥ ऋषिरुवाच ॥ एवमिति ॥ सुरैरिति
छविधया न्यायेन महर्षिपरमपि ॥ नंदनं देवोद्यानं दिव्यैः उत्कृष्टैः गंधाः श्रीखंडादयः आले

पतं श्रीचंद्रनादिः ॥१७॥ भक्तेति ॥ द्वितीयमेनोद्गेः ध्रूपोस्त्विति पाठः ॥१८॥ देव्युवाच ॥ श्रियतामिति ॥
देवा ऊचुर्भगवत्येति ॥१९॥ यदिति ॥ यत इत्यर्थः सर्वाश्च याद्वं उत्तरार्धमुत्तरान्वयि ॥ यद्विवापीति
वाशब्द एवमर्थे यद्येवं सत्यपि वरो देय इति आर्धं उत्तरार्द्धमुत्तरान्वयि ॥२०॥ ते — ति तवेद्यात
तावद्दयमाणमस्त्वित्यर्थः ॥ का स्मार्कं अस्माभ्यं इत्यर्थः ॥२१॥ संस्मृतेति ॥ हिंसेयाद्व इति आर्धं उत्त
रार्द्धमुत्तरान्वयि ॥२२॥ तस्येति ॥ विजर्द्धिविभवैरिति सहयोगे तृतीया ॥ भवने चेत्साहित्यं वित्तं दा
नं तस्य ऋद्धिः तपच यः विभवा ऐश्वर्यादयः ॥ धनदारादीनां संपद अनुरूपात्मभावाः ॥ आ
दिना पुत्रादिः वृद्धये उपचयाय ॥२३॥ स्तविताचइति ॥ तथात्मनः आत्मनश्चार्थे इत्यर्थः ॥
तथेत्युक्ता तथास्त्वित्युक्त्वा भद्रं कालयति वर्द्धयति भद्रकाली ॥ अंतर्हिता अदृश्या वभूवे
त्यन्वयः ॥२४॥ इतीति स्पष्टं ॥२५॥ पुनश्चेति ॥ गौरी गौरी देहः देहः कारणं यस्याः इत्यर्थः ॥ समु
द्भवः कारणं प्रादुर्भावः ॥ यथा येन प्रकारेण तत्र हेतुः दुष्टवधो देवलोकरक्षणं च ॥ ननु तेनाप्य
स्याः कोर्थः सा त्रातोपकारिणीति ॥ उपकारस्वभावा यत इत्यर्थः ॥ तद्धृणुध्वेत्यावार्य्ये स्तउत्त

तत्प्रकारं मया मत्तः निपातोयं ख्यातिलोकप्रसिद्धं ॥ एनामुपक्रम्य लक्ष्मीतिकेन लक्ष्मीवाक्यं ॥ अभिष्टुता
सुरैः साहं महिषं जघ्नुषीत्यन्ततः ॥ महिषांतकरीस्तोत्रं इहेदं देवैर्महर्षिभिः ॥ उत्पत्तिषु देवविश्वोति
स्तोत्रं चेति सुमेधाः ॥ कथयं तिसृष्वेव कीर्तिन्वा हि एताश्वेदपारगाः ॥ लभंते च फलं प्राप्य ददिव्यत्य
मनश्वरमिति ॥ महिषांतकरीस्तोत्रं देवीमहर्षिभिः श्रुद्धं ॥ देव्या यथातत मिति श्लोके स्विलदे
वमहर्षिदृष्टत्वविशेषणत्वात् पुष्पाभिस्तुतये याश्चेति श्लोके सवीर्ण्यं तु स्तुतिके त्वेवमि
पाद्यश्लोकात्मेति बोध्यं ॥ ३५ ॥ २६ ॥ इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते सप्तशतीव्याख्याने
चतुर्थोध्यायः ॥ ४ ॥ यथावत्कथयामीति ज्ञानमिति तामसमाह ॥ ऋषिरुवाच ॥ पुरेति ॥ के
श्यपात् हत्वा मुक्तो न मुक्षिनोऽपि श्रीशुंभनिशुंभाविमौ सतालव्यौ चेति वामनपुराणे ॥ लक्ष्मी
तंत्रे ॥ तामसत्वं तत्रेत्यर्थः महाविद्याभिधापदं गौरीदेहात्समुद्भूता कौशिकीति तदाख्य हे ॥ यथा
यदुत्पदेत्यानां तथा शुंभनिशुंभयोः ॥ श्रद्धीपाश्यतो योयाद्धादेवश्चोष्ठपारिराः ॥ तोषितान

धूम्रधारिण्यः स्वाहा पयं विदधुर्मम ॥ तानि निहत्य दैत्येंद्रान् हंतुं व्यामेयथायथान् ॥ संहृत्य तान्निजाः स
वामस्थिताः विष्णुमुखास्तदा ॥ अहं निजं धनुर्योयश्चाहं दैत्यान् शुंभनिशुंभकाविति ॥ नारायणीस्तुतिर्नाम
सूक्तं परमशोभनं ॥ पुरंदरात हृष्टहृद्दैः देवै राप्तिसंगमे ॥ एवां संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति ॥
कौशिकी सर्वदेवेशा सर्वकामप्रदायिनी ॥ उक्त्वा त्रिपुरवृंदकिन्नरो निरस्तुति श्चैतिपुरातनैः ॥ पठ्यते त्रितयं
विप्रैः वेदवेदांगपारगैः ॥ एतां साधरमात्रोक्तां कृष्ट स्थासा महीयते सौ ॥ महालक्ष्मीर्महाभोगा
प्रकृतिः परमेश्वरी ॥ श्रमुख्यास्तु तयेदं स्तोत्रं लाघे सकलैः सुरैः ॥ नमो देव्याइकं देवी सूक्तं सर्वं
फलप्रदं ॥ इमां देवीं स्तुवन्नित्यं स्तोत्रेणानेन मामिह ॥ क्लेशान्नतीत्य सकलानेस्वर्यं महदश्नु
तेइति ॥ यज्ज्ञात्वा वेश्यपुरर्थो परां सिद्धिमवाप्नुरिति ॥ अग्निमुखदेवगणादृश्यं स्तोत्रं नारायणी
सूक्तं ॥ तत्र नारायणिनमोस्तु तइतिवहुधाभ्यासात् नमो देव्यैइत्यादिकं देवीसूक्तं ॥ देवीपदेनोप
क्रमात् क्षितिपोध्यं ॥ मत्तोगर्वबलं शाक्तिः ॥१॥ नावे वेति ॥ स्तुवतिकर्मणि लोकं श्रीरयतीति स्तूयं
स्य स्तस्यभावः सर्वलोककर्मप्रेरकता ॥ तद्देवसमाधिकारं तथाकोवेरं वरुणस्य चाधिका

इमित्यन्वयः ॥ ३ ॥ तौविति ॥ पवनः अध्यास्तेऽनेनेति करणेऽधिकरणे नदधिकारमित्यर्थः ॥ विनिर्धू
ताः कंपिताः अतः परैरसुरैस्तो जिताः ॥ संतः भ्रष्टराज्याः जाता इत्यर्थः ॥ ४ ॥ हृतेति ॥ आत्मसात्कृ
ते इत्यर्थः ॥ अधिकारास्त्रिराणवृत्तादशाश्रितदशाः ॥ अधिकारवृत्तस्देयार्थोऽत्तमोवेनेकार्थाभावात्ते
न त्रयस्त्रिंशादित्यर्थः ॥ ते चाष्टौ वासवः एकादश रुद्राः एकादशास द्वादशो विश्वेदेवा द्वाविति ॥ एके एव त्रिंश
द्भ्रस्तं त्रैलोक्याभयार्थः ॥ निराकृताः स्वर्गादपि निःसारिताः संस्मरंति ॥ स्मृतवंतः ॥ वर्त्तमानसामीप्ये
भूते लट् ॥ ६ ॥ तत्र हेतुमाह ॥ तयेति ॥ स्मृता सती अखिलाः परमापद हरतीत्यन्वयः ॥ ५ ॥ इतीति ॥
भवान्यो भग्नमिव्याजिस्थानत्वाद्धिमवन्तमगमन् ॥ तत्र हिमवति ॥ शुंभनिशुंभदमनप्राः सरस्वतीत्व
पिधया विष्णुमायात्वं तयोक्तमुपक्रमे ॥ ६ ॥ प्रसादयोतितां श्रावात्येन स्तुतिमाह ॥ देवा ऊचुः ॥
नम इति ॥ देवीधुत्पादिमती ॥ महादेवी ॥ महत्तां त्रैलोकादीनामपि देवानां सर्गादिव्यवहारप्रवर्त्तयि
त्री ॥ शिवा मुक्तिरूपा ॥ प्रकृत्यै सृष्टिशक्त्यै ॥ भद्रा रक्षणशक्तिः ॥ नियताः समाहितचित्ताः ॥ प्रण
ताः स्मस्मेति पादस्मरणे ॥ ७ ॥ रौद्रायेइति ॥ संहारशक्त्यै ॥ नित्या कालानवच्छिन्ना नित्यात्वं

शक्तिरूपा च ॥ गौरीति तद्वर्णा ॥ धात्री जगदाधारा ॥ ज्योत्स्नाः चंद्रकिरणाः ॥ इंदुरूपः इंदुरुपलक्षणं ज्यो
तीरूपत्वमस्याः ॥ सुखा परमानंदरूपा ॥ ८ ॥ कल्याण्यैति ॥ नतेभ्यो वृद्धिरूपवर्षः सिद्धिरणिमादि
रष्टविधाः ॥ प्रणतानन्त्राः ॥ नम्रो नमः ॥ कुर्म इत्यन्वयः ॥ निरितिरलक्ष्मीः स्वार्थेण ॥ यद्वा नैर्ऋत्ये
रूढेश्रावेद्ये ॥ शर्वाणी शिवशक्तिः ॥ ९ ॥ दुर्गायै इति ॥ दुर्गं दुरधिगमः पारः परिच्छेदो यस्यास्तस्यै ॥ दुर्ग
संसारात्पारं करोतीति च ॥ सारा एव बलं तद्रूप्यै ॥ सर्वकारिण्यै सर्वजननेस्वतंत्रायै ॥ ख्यातिःप्रत्य
भेयाभिदृज्ञानं ख्यातितद्रूपायै प्रसिद्धेर्वा ॥ कृष्णा तद्वर्णा कृष्णशक्तिर्वा ॥ धूम्रा तद्वर्णा धूम्राव
तीशक्तिर्वा ॥ १० ॥ अतीति ॥ विद्यात्वेन संसारतापस्यामनत्वादित्यर्थः ॥ जगत्प्रतिष्ठा ॥ जगदुपा
दानकारणं ॥ जगदाधारेत्यर्थः ॥ देव्यै देवशक्त्यै ॥ कृतिः क्रिया ॥ ११ ॥ या देवीति ॥ विष्णुमायानन्तला
विधेति शब्दिता सर्वागमेषु श्रुतिपादिता ॥ नमस्तस्यै इति त्रिकेण कायिकवाचिकमानसिकरू
पनमस्कारत्रयं दर्शितं एवमग्रेपि ॥ १२ ॥ चेतना निर्विकल्पं यादृशं शक्तिरित्युच्यते ॥ १३ ॥ बुद्धिः स
विकल्पकं ज्ञानं ॥ १४ ॥ निद्रा सुषुप्त्यवस्था स्वप्नावस्था च ॥ १५ ॥ क्षुधाऽभ्यवजिहीर्षा ॥ १६ ॥ छा

यासंसारतत्याभावः वर्णेश्रकादंश्च ॥१७॥ शक्तिः कार्यजननसामर्थ्यं ॥१८॥ तृष्णाप्राप्तानात्मीयस्वी
कारेछा ॥१९॥ छांतिः सत्यपि सामर्थ्ये ऽपकारिणि अपकारं चिकीर्षा ॥२०॥ जातिर्गोत्वादि ॥२१॥ ल
ज्जा स्वाकार्यक्रियया अन्यज्ञानभीः ॥२२॥ शांतिरिंद्रियसंयमः विषयोपरतिरूपः ॥२३॥ श्रद्धा
श्रुत्याद्युक्तेर्थे आस्तिकत्वं ॥२४॥ कांतिः शोभा ॥२५॥ लक्ष्मीर्धनादिसंपत् मोक्षश्रादिवी ॥२६॥ वृ
त्तिर्जीविका कर्षादिश्च ॥२७॥ स्मृतिरनुभूतविषयं ज्ञानं ॥२८॥ दया परदुःखप्रहाणेछा ॥२९॥
तुष्टिरधिगतानभिलाषः ॥३०॥ माता पालयित्री मातृकाद्यष्टाश्रीदेवता वा ॥३१॥ भ्रांतिरतद्
तितद्बुद्धिप्रत्ययः ॥३२॥ इंद्रियेति ॥ इंद्रियाणां ज्ञानकरणानां भूतानां च ज्ञानविषयाणां सूक्ष्म
स्थूलानां अधिष्ठात्री प्रवर्त्तिका ॥ या अखिलेषु भूतेषु अंतर्यामिविधया स्थिता तस्यै व्याप्तिदे
व्यै व्याप्तिकार्यै इत्यर्थः ॥३३॥ चितिः चयनं बुद्धिः ॥३४॥ नम इत्यनेन नमोंतमंत्रस्वरूपत्वं इदमुप
लक्षणं सर्वमंत्रस्वरूपत्वस्येति केचित् ॥ अत्रार्थसंग्रहः ॥ विष्णुमाया चेतना च बुद्धिर्निद्रा क्षु
धा तथा ॥ छाया शक्तिश्च तृष्णा च छांतिर्यातिस्ततः परे ॥ लज्जा शांतिस्ततः श्रद्धा कांतिर्लक्ष्मीस्मृ

तःपरा॥ वक्तिःस्मृतेदृयाचैवतनुष्टिसोतातततःपरं॥ श्रोतिर्थ्योविछितिश्चैवत्रयोविंशतिसंख्यकाः॥
इतोधिकमनार्षं स्यात्तंत्रे कात्यायने स्फुटं॥ स्तुतेति॥ याशुभहेतुरीश्वरी सुरैर्वृन्दादिभिः पूर्व्वं स्तुता
॥ तथा इंद्रेणाभिहितत्वात् धत्यभीष्टस्य संश्रयात् प्रापितैः॥ दिनेषु प्रतिदिनं सेविता नःशुभानि भद्राणि
श्रतिभावितमपूर्णानि करोतु॥ आपदश्चाहं त्वित्यन्वयः॥ ३५॥ येति॥ सांप्रतं च याइष्टा सुरैरस्माभिः
उद्धतदैत्यपीडितैः॥ नमस्यते स्तूयते च करोतु सा न इत्यनेनान्वयः॥ या च भक्तिनम्रशरीरैरस्मा
भिःस्मृतासतीस्मृतितत्क्षणमेव एवनःसर्व्वापदोहंति करोतु सा न इत्यनेनान्वयः॥ ऋ॥ ऋषि
रुवाच॥ एवमिति॥ तत्रदेवसान्निहितेदेशे हे राजन्॥ पार्वती जाह्नव्यास्तोये स्नातुं स्नातुमभिवस्वी
यक्षावनतिपुत्राणां देवानामपि सन्मुखं यथा वित्यर्थः॥ तथा तेषामत्रानंद इष्टाकोस्ति यतईप्सि
तं इष्टमिति॥ ७॥ सेति॥ कामदन्यास्तूयते यन्मां नाभिभाषथ मदन्यायाश्चभावादितिभावः॥ ततो
ध्यज्ञानमेव दद्वा तेषां दयया स्वयमब्रवीत्॥ श्रयाद्भितिउक्तेः॥ राजानं प्रतिऋषेर्वचः शारीरस्
पात्कोशतो गृहात्समुद्भूतास्तस्य पृथानां शोन प्राङ्मुहूर्ता ततएवाभिवाब्रवीदित्यर्थः॥ ऋ॥ कि

मध्ये बीजत्वमाह ॥ स्तोत्रमिति ॥ समेतैः मिलितैः हृतैः निशुंभेन पराजितैः अत एव शुंभेन निराकृतैः
स्वर्गादिति भावः वेमोष्ठः ॥ ८६ ॥ शरीरेति ॥ यतः निःसृता ततः कौशिकीति गीयते इत्यन्वयः कौशिकीति ना
लमध्ये ॥ तस्याः शरीरान्मूलप्रकृतिरेवैवं रूपेण निर्गतेति बोध्यं ॥ ८० ॥ तस्यामिति ॥ कृष्णाभूत्तत्कृष्णवर्णे
वाभवत् सर्वेतुं रक्तवर्णे मिश्रवर्णे श्यामवर्णा पार्वती गौरीति सुनाममात्रं पार्वत्याः गौरवर्णा कौशि
कीकारणत्वाद्धौ गौरीति नाम तस्याद्रुतिबोध्यं ॥ आश्रयस्थानं तदुक्तं वैकृतिकरहस्ये गौरीदेहात्स
मुद्भूता यासत्वैकगुणाश्रया ॥ साक्षात्सरस्वती प्रोक्ता शुंभासुरनिवर्हिणी ॥ दधौ चाष्टभुजा बाण
मुसलं शूलचक्रभृत् ॥ शंखं घंटां लांगलं च कार्मुकं वसुधाधिपः ॥ एषा संपूजिता भक्त्या सर्वे
ज्ञत्वं प्रयच्छतीति ॥ शिवपुराणे संहितायां ॥ दैत्यौ शुंभनिशुंभाख्यौ भ्रातरौ संबभूवतुः ॥ ताभ्यां चि
तपसा ताभ्यां ब्रह्मणः परमेष्ठिनः ॥ अवध्यत्वं जगत्यस्मिन् पुरुषैरखिलैरपि ॥ अजोनिजानुया
कन्यास्त्वंगकोशसमुद्भवा ॥ अजातपुंस्पर्शरतिरविलंघ्यपराक्रमा ॥ तयानुनौ वधः संख्ये तस्यां का
माभिभूतयोः ॥ इति चाभ्यर्थितो ब्रह्मा ताभ्यां प्राह तथास्त्विति ॥ ततस्ताभ्यां जगति उपद्रुते त्रयोल
याय देवेशं ब्रह्माणमर्थितवान् शिवं ॥ विरिंचोपि रहस्यं वा बोधयित्वा यथातथं ॥ तद्वर्णकोश

ज्ञां शक्तिमकामां कन्यकां कालिकां ॥ निशुंभशुंभयोर्हंत्रीं देवेभ्योदातुमर्हसि ॥ एवमभ्यर्थिता धात्रा भग
वान्नीललोहितः ॥ कालीत्याहहरस्त्वंवामित्युक्ते क्रुद्धा गौरी दृष्ट्वा क्रीडार्थं कालीत्युक्तामिति शिवेनो
क्तः ॥ भूयसी च तथा श्रीति रोषो ऽभितिमेव पुनः ॥ क्रीडे किमपि कालीति घटेन कथमन्यथेति देवी
वचनमुपन्यस्य कथंचिद्देवाज्ञया देवी किमप्यमाश्रयं त्रायध्वं पश्चात्सुरेत्याह ज्ञो गुणाधिकात्तत्र च रणे
गौरस्वरूपं प्राप्य नीलकोशं मुक्त्वा स्वयं स्थिता ततः कोशाद्भूता कौशिकीत्युक्तं ॥ तत्कोशं सहसा तत्र ज्योगे
शीघ्रसमाजायत ॥ सानुमाया त्रिकाशक्तियौगनिद्रा हरेः स्मृतेति ॥ ततः प्रत्यागतया स्वया देवं
प्रति कौशिकीमहिमा कथितस्तत् ॥ किं देवेनस्याद्दृष्टा या दृष्टा कौशिकी माया तादृशी कन्यकालोके
न भूता न भविष्यति ॥ अजातपुंस्पर्शेति रथ्थ्या चातिसुंदरीति ॥ यस्याः शरीरकोशाद्यं निर्गि
ता सा मातंगी ॥ यानिःसृता सा भवत्तारा ॥ उग्रादपि भयात्राती त्यत इति कालिकापुराणे स्पष्टं ॥ तथा
श्रीकाश्यकोशादुद्भूता कालिकायाः शुभेरवात् ॥ सा कौशिकीति विख्याता चारुरूपा मनोहरेति
तत्रैव तत इति ॥ परं उत्कृष्टं ॥ ८७ ॥ ताभ्यामिति ॥ शुंभायेति क्रिययाप्यमभिप्रेतीति संप्रदानत्वं ॥ को
पि श्रलिनिर्वाच्या ॥ ८८ ॥ नेवेति ॥ असौ देवी कापि श्रुतो ज्ञायतां मनुष्य द्वारा तत्स्वरूपं विचार्य

तां गृह्यतां च अंगीक्रियतां च ॥४४॥ ननु किमर्थमंगीकारः स्यादित्यत आह ॥
॥ त्री॥ त्वमिति ॥ उत्तमस्त्री इत्यर्थः ॥ भवान् तां द्रष्टुमर्हति ॥ सा तव दर्शनयोग्या यतोऽतां गीक्रिय
तामिति भावः ॥ नुदेहेनो ननु यदि सा रत्नभूता कथं अस्माकं स्यात्स्यादित्यत आह ॥ धनीति ॥ धानि गजा
श्वादीनि रत्नानि मिथ्याति प्रेक्ष्यानि तेऽर्हन्तो ॥ एवं वसन्नस्त रत्नानि यत्नस्त्वं गृहे तदुच्य मपितव भवि
ष्यत्येवेति भावः ॥४५॥४६॥ तदेव विवृणोति ॥४७॥ विमानमिति ॥ वेधसो वरप्रदस्यापि यद्विमान
मानितं तदहृतं एवं चांडात वृत्तिः सकलाऽप्यलं स्यात् आनीतं वकुलानलं तं नुदत्तं स्वदत्तवरत्वाद्व
तेनोपेहितं इति हृदयं ॥४८॥ निधिरिति ॥ किं जितानि नीतं ताम्रकां द्रष्टा वित्तस्य भयादि तिमोषः
॥४९॥ छत्रमिति ॥ कांचनश्रा मिश्रवर्णं वर्षणशीलं प्रजापतेर्दत्तस्य अयं रिपुरणामजेयः ॥५०॥
॥ मरुतो रिति ॥ उक्रांति मेरणां ॥ परि गृहे परीजने ॥ करणं कृत्य तथा हस्तैर्वा ॥५१॥ निशुंभस्येति ॥ आ
ध्येजारत्नजातयश्च निशुंभस्य परिग्रह इत्यर्थः ॥ अग्निशौचे अग्निरेव शौचं नैर्मल्यं यकारणं
यथा रित्यर्थः ॥ कल्पवह्नोप कल्पितं अग्निदेवत्यं अग्निप्रहेपयने यमलं वासोयुग्मं अग्नि
शौचाख्यमाहुः ॥५२॥ एवमिति ॥ तेइतिवर्जुः शोभनविवहेत्ययः च ह्हो ॥५३॥ अर्धि हवाच ॥ निश

ध्येति ॥ सुग्रीवं तन्नामानं ॥ ५४ ॥ इति चेदिति चेति ॥ इत्थं चेत्यर्थः ॥ वृत्त्या भाषणस्य परामर्शः अनेन शु-
म्भनिशुम्भयोः रत्नोपगुणमयत्वं सूच्यति ॥ अत एवैतद्वधार्थं सत्त्वगुणप्रधानो वतारः इति वो-
ध्यं ॥ लघु मीत्र ॥ ५५ ॥ स इति ॥ स दूतः ततः शुम्भसकाशात् यत्र शैलोद्देशे सा देवी आस्ते तत्र
गत्वा श्लक्ष्णया मनोज्ञं मधुरया कोमलया गिरा आह इत्यन्वयः ॥ ५६ ॥ दूत उवाच ॥ देवीति ॥ न केव-
लं दैत्येश्वर एव किंतु त्रैलोक्यस्य परमेश्वर इत्यर्थः ॥ सकाशं समीपं ॥ ५७ ॥ देवोपपादयतीति ॥ आ-
ज्ञाहतेति ॥ देवयोनिषु देवनाग्यगणेषु ॥ ५८ ॥ तदुक्तिमाह ॥ ममेति ॥ वशगाः अत एवानुगा चेत्य-
र्थः ॥ पृथक् पृथक् इंद्राद्या धिष्ण्या भेदेन ॥ ५९ ॥ अशेषाः श्रेष्ठानि हृत्वेत्याद्युत्तरान्वयि ॥ ६० ॥ ह्रीरे-
त्रैलोक्येति
दिति ॥ महेश्वरं त्वं हृत्वा इंद्राद्वलात्कारेण गृहीत्वा आसमेरे ब्रालिपत्य ममसमर्पितमित्यर्थः ॥ अ-
वसेत्यत्र हस्तोदक्षाद्दिलावर्णागमीक्षितान् ॥ ६१ ॥ यानिचेति ॥ रत्नभूतानि भूतानि रत्नरूपाणि
स्थितानीत्यर्थः ॥ ६२ ॥ स्त्रीति ॥ वयमित्यात्मगौरवार्थं बहुवचनं ॥ ६३ ॥ मांवेति ॥ उक्तविक्रमम-
हाविक्रमं वेधसि ॥ ६४ ॥ परमेति ॥ ध्यास्यसे इति ध्यानं समस्तु ॥ मत्वा ऐश्वर्यात् मदाश्रयात् ॥ समा-
लोच्याविचार्य ॥ मत्वा ऐश्वर्यं हतां मत्पत्नित्वं ॥ ६५ ॥ इत्युक्ता देवी ॥ इतीति ॥ अंतः स्मितत्वेन सा वदे-

तन्मयोक्तं स्तुवितं ॥ ६५ ॥ देव्युवाच ॥ सत्यमिति ॥ अत्र शुंभविषये त्रैलोक्याधिपतिरिति समस्तं ॥ ६६ ॥
किं त्विति ॥ अत्र यो मां महत्त्वविषये अल्पबुद्धित्वादिति संभवात् यो मां जित्वा हानो च महान् दोषः पापं
च पुरुषधारिमहे ॥ ६७ ॥ प्रतिज्ञातमाह ॥ यो मामिति ॥ जयतीति संग्रामात्तिरेतेनाधिक्कारे लसंग्रा
मे यो मे दर्पं बलत्वाभिमानं व्यपोहति ॥ यो मे प्रतिबलः समानबलः एवं स्वभावे उत्तरः ॥ ता
दृशाश्च न त्वद्विजेति गूढ आशय ॥ ६८ ॥ ६९ ॥ तत्सर्वं मम गमनमनुचितमिति भावः ॥ ७० ॥
दूत उवाच ॥ अवलिप्तेति ॥ अवलेपो गर्वः एवं प्राक् उक्तं यदन्ये पुमानपि न तिष्ठन्ति तद् एनस्त्रीन
तिष्ठेदेवेति भावः ॥ ७१ ॥ नन्वहं देवी त्वतः स्थास्यामीत्यत आह ॥ अन्येषामपीति द्वयं ॥ एभिर्मेति
कुत्सायामकच् ॥ ७२ ॥ ७३ ॥ उपसंहरति ॥ सा त्वमिति ॥ मयेवेत्यनेनान्यागमने ऽन्येषां सर्वेषां
दुष्टतया गौरवं न तिष्ठेदित्यर्थः ॥ तदेवं विवक्षये बाधकमाह ॥ केशाकर्षणे स्रोतो न निर्दूतं स्वं त्वितं मो
त्वं यस्यास्त्वाद्दृशीमाशानिष्यासि स्त्रीति ॥ मा न त्वर्थे सकाकुश्च ॥ ७४ ॥ देव्युवाच ॥ एवमेतद्
ति ॥ सा पहासं यतु प्रतिज्ञातेत्यस्य कृतेति शेषः ॥ ७५ ॥ स त्वमिति ॥ मया यदुक्तं तदुक्तं तत्सर्वमाह
नः सन्तु तस्माद्याचत्वम् स यदुक्तं तत्करोतु चेत्यन्वयः ॥ आहतत्त्वत्यनेनान्यूनानीति रिक्तं वदे

तिस्त्स्यते॥७६॥ इति श्रीवभट्टसुतसतीगर्भजनागोजीभट्टकृते सप्तसतीव्याख्याने पंचमोध्यायः॥
॥५॥ ऋषिरुवाच॥ इतीति॥ अमर्षः कोपः समाचष्ट उक्तवान्॥१॥ तस्येति॥ दैत्यानामधिपतिं स
नापतिं॥२॥ हे इति॥ दुष्टां दुर्वचनां॥ विह्वलां आकुलां॥३॥४॥ ऋषिरुवाच॥ नेनेति॥ सहस्राणां
मधुरगणांश्च दृष्ट्वा वर्तते इत्यन्वयः॥५॥ स इति॥ तुहिनं हिमं॥ मूलं समीपं॥६॥ विवदेद्वाधकेमाह॥
नैवेति नपदस्यार्थः॥७॥ देव्युवाच॥ दैत्येश्वरेणेति॥ एवं केशाकर्षेण विह्वलां॥ बलं सामर्थ्यं
सेनाद्यैः सावष्टंभोक्तिरेषा॥८॥ ऋषिरुवाच॥ इतीति॥ तं साभ्रमस्य चकारेत्यन्वयः॥९॥ अथेति॥
अंबिकायाः त्रीभ्रान्तएव न तथा पदस्याहरस्यं॥१०॥ निनीयसैन्ये दैत्याः अधासो व्यर्थ इति मत्वा॥
सिंहोपपुच्छे॥ ततइति॥ तत्र हेतुगर्भं विशेषणं॥ स्वावाहनं इति॥ अर्द्धचौरिदृत्वात्स्वं स्वीयवाहन
इत्यर्थः॥ पपात आविशात्॥११॥ कोपेति॥ स सिंहः॥ आक्रांतिरा क्रमणं तेन अधरेण॥ अथ
रकाये नाधरोष्ठेन वान्यान्महासुरान् उजधानेत्यन्वयः॥१२॥ केशाभिमिति॥ कोष्ठानि उदरमध्यानि
तलो विस्तृतो ग्रुलिः पालिः॥१६॥ तो दवीं जो॥१७॥ हे चंडेति॥ बहुबले बहुभिरित्यर्थः॥ गच्छत
गच्छतं॥ छंदसे नरोधाद्विंदुलोपः॥ लघु शीघ्रं॥१८॥ आनयने प्रकारद्वयमाह॥ चंतेति॥ केशेष्व

ति॥ आकर्षणमत्रादेनागमनेबंधनं इतिगौरवाद्बहुवचनं॥ सेनाभिप्रायेणवा॥ तयासहयुधियुद्धेच
सक्तेयदितथानयनेसंदेहस्तासर्वदैत्यैः सर्वैर्लोयुधैः साविशेषणेनहन्यतामार्यतामित्यर्थः॥
॥६॥ उपसंहरति॥ तस्यामिति॥ आगच्छन्तामित्यन्तेन॥ सर्वथाग्रहीतुमसमर्थाचेद्देवहन्तव्यानान्यथे
त्याह॥ वध्येति॥ अथेति॥ पक्षान्तरेयदिशक्यतेनहिवध्यान्तां ग्रहीत्वेवागन्तव्यमित्यर्थः॥ धूम्रलो
चनहन्त्रेवधस्मावती॥ इयमवधस्त्रायदेनोक्ता॥८॥ इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्ट
कृतेसप्तशतीव्याख्यानेषष्ठोध्यायः॥६॥ ऋषिरुवाच॥ आज्ञप्तास्तेइति॥१॥ ददृशुरिति॥ शैलेन्द्रस्यशृंगे
हिमाचलशृंगेसिंहस्योपरिस्थितामित्यन्वयः॥२॥ तेइति॥ चण्डादयःसप्रधानाःसमाहर्तुंग्र
हीतुंउद्यमंउद्योगंचक्रुः उद्यताः उत्साहवन्तोजाताः॥ आकृष्टेति॥ आकर्षणंतत्कृष्टाः कोशाद्दूरीकृताश्च
तत्समीपगाः प्रहीतुमुद्यतानांरक्ताभार्थेसमीपगाइत्यर्थः॥३॥ अनेनचण्डादीनांमतिनाशस्स
म्बन्धनित्वं॥ अमसाद्धार्थंतामसीप्रादुर्भावमाह॥ ततइति॥ मसीलिपिसाधनंद्रव्यंतद्वत्सश्या
मवर्णानिःसरत्कालीप्रतिबिम्बादितिभावः॥५॥ भ्रुकुटीति॥ तस्याःकुपितदेव्याः विनिःक्रान्तानिः
सृता॥५॥ विचित्रेति॥ खट्वांगंगन्धर्विकावत्कालपं जगस्थिवा॥ नरमालेत्यत्रनरपादस्तानुंडला
सृणिकः द्वीपीव्याघ्रः शुष्कमांसानिमांसदेहा॥ अतएवातिभैरवा॥६॥ अतीति॥ अतिशयितनावि

स्तारो यस्य तादृशं वदनं यस्याः इत्यर्थः ॥ ललनं चालनं ॥ निमग्नानि निम्नप्रविष्टानि आरक्तानि
नयनानि यस्याः त्रिनेत्रत्वात् ॥७॥८॥ पार्ष्णीति ॥ पार्ष्णिग्राहा गजपार्श्वरक्षकाः अंकुशग्राहा म
हामात्रः योधो गजोपरूढो वीरः ॥९॥ तथैवेति ॥ योधमिति जातावेकवचनं एवं रथमपरमन्यमित्या
दावपि ॥ चर्वयंती वर्त्तमानसमीपे भूते लट् ॥ अतिभैरवमिति क्रियाविशेषणं ॥१०॥ एकमिति ॥
महात्मानां महादेवानां अपोथयत् अवधीत् ॥११॥ तैरिति ॥ मथितान् मथितानि च चर्वितानीत्यर्थः
॥१२॥ बलिनामिति ॥ महात्मनां महादेहानां ॥१३॥१४॥१५॥ शरेति ॥ शरवर्षैः मुंडः सहस्रशः क्षि
प्तैः चक्रैः छादयामासेत्यन्वयः ॥ एवं च सर्वश्लोके चंडग्रहणं मुंडस्याप्युपलक्षणं ॥१६॥ तानी
ति ॥ मुखं विशमानानि चक्राणि घनोदरं विशमानान्यर्कबिंबानीव बभ्रु बभुः ॥ शानच्छांदसः ॥
॥१७॥ ततइति ॥ भीममिति क्रियाविशेषणं ॥ वक्त्रांतः वक्त्रमध्ये विकटदंतत्वात् दुर्दर्शा ये दशना
स्तैरुज्ज्वलाः तेजोमयी ॥१८॥ उत्थायचेति ॥ महासिं महाखड्गं उत्थाय उद्यम्य सकोपं चारणं च
या स्यात्तथाह मित्युक्त्वा देवी चंडमधावत ॥ अस्य चंडस्य तेनाघातेन ॥१९॥ अथेति ॥ खड्गाभि
हतं खड्गघातं खड्गाभिहतं तस्य शिरो न छिन्नं किंतु खड्गप्रहारमात्रं ॥२०॥२१॥ शिर इति ॥ चंडं

सशिरस्कं तद्देहमित्यर्थः ॥ एवं ऽट्टहासेन भिन्नयुक्तं यथा भवति तथा चंडिका यल्ललाटफलकान्निर्गता
देवी आहेत्यर्थः ॥ २२ ॥ मयेति ॥ अत्र युद्धयज्ञे ॥ महापशू रूपकं ॥ उपाहृतौ युद्धनामाह्वानेन चंडमुंडयो
पहारः ॥ २३ ॥ ऋषिरुवाच ॥ ताविति ॥ कालीं ललाटभवां ॥ कल्याणीति कर्तृविशेषणं चंडिका कौशि
की ॥ २४ ॥ यस्मादिति ॥ चंडं शिरोद्वारा ॥ हृदेवख्याता भविष्यसीत्यन्वयः ॥ चामुंडा इ पृषोदरादित्वा
त्साधुः ॥ २५ ॥ अनेनेयं तामसी कौशिकीजन्या काली कौशिकी निर्यम्येति दर्शितं ॥ इति श्रीभट्ट
सुतसतीनाथजनागोजीभट्टकृते सप्तशतीव्याख्याने सप्तमोध्यायः ॥ ७ ॥ ऋषिरुवाच ॥ चंडे इति ॥ क्ष
यितेषु नष्टेषु ॥ १ ॥ तत इति ॥ ततो वधजकोपेनास्वाधीनचेताः ॥ अत एव स्त्रीवध्येप्यस्य
प्रवृत्तिरिति भावः ॥ सर्वसैन्यानामिति दैत्यानां विशेषणं ॥ २ ॥ अद्येति ॥ उदायुधाः उद्यतायुधा
स्तत्संख्याकाश्च कंबूनां तन्नाम्नां ॥ चतुरशीतिरित्या इति शेषः ॥ ३ ॥ कोटीति ॥ कोटिवीर्याणि
तन्नामानि ॥ धौम्राः धूम्रवंश्याः ॥ ४ ॥ कालकास्तन्नामानः दौर्हृदाः दुर्हृदो यत्यानि ॥ मौर्याः तन्ना
मानः ॥ तथा कालकाया अपत्यानि कालकेयाः असुराः सकलाः ससामग्रीकाः ॥ ५ ॥ इतीति ॥ भैर
वमुग्रं ॥ ६ ॥ आयांतमिति ॥ आगतमित्यर्थः ॥ अंतरं मध्यं ॥ ७ ॥ तत इति ॥ तन्नादानिति वहुधवनं महा

दृष्टमित्येकत्वविवक्षया ॥ अतीवेत्यस्यानेकवारमित्यर्थो वा ॥ उपयंहयदित्य त्रार्षो उभावः ॥८॥
धनुरिति ॥ नादैः स्वीयेन स्वरेणेति दिङ्मुखा कालीधनुर्ज्या सिंहघंटानां भीषणेनो दीर्जिगयजिता ॥ दे
त्यैः सक्रोधैः ॥१०॥ एतास्मिन्निति ॥ देवीदानवसंघाता वसरे भवाय संपरे ॥११॥ ब्रह्मेति ॥ विष्णु
दिक्षुपैः शाक्तेन वाराहन्टसिंहावपि शाक्तेयः ॥ स्वयमिति रेकिएयो देवताः ॥ शक्तिः शक्तिमतो सदा त्स्यात्
॥१२॥ अस्मादिस्येपेरित्यर्थे तद्रूपैरिति व्याचष्टे ॥ यस्येति ॥ तद्वत् ॥ तथाविधरूपभूषणवाहनेत्यर्थः
॥१३॥ हंसेति ॥ विमानागे इत्यस्य स्थितेति शेषः ॥ अक्षसूत्रं जपमाला ॥ ब्रह्माणीब्रह्माणमानयतीति
ति व्युत्पत्त्यायं शब्दः साधुः ॥१४॥ माहेश्वरीति ॥ महाहीन् तद्वोनं तौ वलयौ यस्याः चंद्ररेखा तत्
त्वेना ॥१५॥ कौमारीति ॥ गुहरूपिणी गुहसामानाकारा ॥ कुमारसंबंधिनी शक्तिः तयया वित्यर्थी
न्लेमेन रुजपं ॥ एंद्रीमुक्ता पियथा शक्रस्तथैव सेति वत् ॥ अविकोपदेन गुहस्य शिवस्याहगत्वं स्वचय
ति ॥१६॥ तत्र थेवेति ॥ अत्र च शार्ङ्गपदेन वा लोप्युपलक्ष्यते ॥ वहुस्त्रिमेत्रिन्ट्स्टा शंखचक्रगदाप्रिनी ॥ शार्ङ्गि
वा लीधरा जाता वैस्नवी स्पप्राशालिनीति वामनपुराणात् ॥ पूतेनास्याः कद्रूजात्वं ॥१७॥ यज्ञेति ॥ यज्ञो
गओलितकोल का ऐं विभृतो हरेरित्यनेनास्याः वैस्नुत्वमेवेति सत्स्वितं ॥ एवंनारसिंहीपि ॥ नत्वेवंको

किंतु हरेः शरभावरोहेतु देवि स्तोः प्रारंभ पक्षपातितं वराहवलदारकत्वं मुक्तं न तु सिंहस्य च वराहानुपायि
त्वं मुक्तं विरुध्येतेनि वाच्यं ॥ तस्य लीलामात्रत्वात् ॥ १७ ॥ १९ ॥ वज्रेति ॥ यथा शच्या इत्यकारपरं एवं च
सर्वास्तु तत्तदाकाराद्यवगम्या ॥ गजराजे ऐरावते ॥ २० ॥ आतीति विनिष्क्रांते जसः कौशिक्याः स्वविधे
स्वयं गंतुम शक्ताः स्ता देवशक्तीरीशानो देवेर्द्रवीत वानित्याह ॥ तत इति ॥ ताभिः परिवृत ईशान
मम प्रीत्या एताभिर्देवशक्तिभिः सहासुरा हन्यंतामिति चंडिकां प्राहेत्यन्वयः स्वशक्तेः प्रावृत्याः
प्रादुर्भूतत्वेन दृष्टत्वात् ईशान एव तत्योज्ञेवानिति भावः ॥ अंडाधिकारिण्यामेव ह्लादयन् ॥ अं
तराधिकारिण्यां शुभादिजितत्वेन दृष्टत्वा संभवात् ॥ २१ ॥ स्वस्याभिसहप्रदर्शनेने अदृष्टा
भागवती तस्योत्तरं नाह किंतु कोविषद्वतीरित्याह ॥ तत इति ॥ अतिभीषणमदर्शनमात्रेणभयंकरी
अत्युग्रा रौद्रस्वभावा शिवानां शृगालीनां शतेन निनादिनो ॥ शतशब्दोऽनंतवाची ॥ निनदद्
नेन शिवावृत्तां ॥ २२ ॥ एषैव शिवदूती ॥ अस्याः हैमंकरी शांता वेदमाता महोदरी केशल्योकामद
मशास्याभग्नमालिनी भगोदरी भगहा रभगा जिह्वा भगास्या इति द्वादश योगिन्य इति का
कौमुदी ॥ सा चेति ॥ धूम्रजटिलं ॥ धूम्रवर्णजटावंतं ॥ अपराजिता तदाख्या अपराजिता च

दूतभावं वार्त्ताहरत्वं गच्छ शुंभनिशुंभयोः पार्श्वं गच्छेत्यन्वयः ॥ आहेति निपातः कालमात्रेणाखवी
दित्यर्थः ॥ एतादृशं चापि हृत्या स्यास्तस्या दुर्भाविकस्य मकतया आधिक्येन तस्य दूतेन प्रेषणं चानुचि
तं लीलामात्रं वा ॥ २३ ॥ श्रुतेति ॥ ये च तत्र शुंभनिशुंभकेन्ये दानवास्ताः श्रुत्वाहेत्यन्वयः ॥ युद्धाय युद्धं क
र्तुं ॥ २४ ॥ वचनमाह ॥ त्रैलोक्यमितिस्पष्टं ॥ २५ ॥ बलेति ॥ अबलेयोवर्गः मदिश्चाः यासदानिनं दैत्यः
का दुर्मैतानपिशितं मांसं ॥ २६ ॥ यत्तु इति ॥ दूत्यमेव देत्यं प्राज्ञाधिगए ॥ शिवदूती गोता देव्या कीर्तिए ॥
अस्यां गालय पादादितिवा ॥ २७ ॥ तेपीति ॥ अमर्षेण सर्वेतः परीताः यतः यं देशमाक्रम्य कात्यायनो
स्थिता तद्देशं जग्मुरित्यन्वयः ॥ फलशन्तभेदेन वृस्या ॥ अपि कात्यायनी त्वो कि ॥ २८ ॥ ततइ
ति ॥ प्रथमपादे ॥ आनेसन्मुखे वर्वत्तुरिति गुणः छांदसः ॥ उद्धतः प्रकटः अनेनस्त्री प्रथमतः हं
